CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अग्निं प्रज्वाल्य।

श्रीगणेशाय नमः॥ अथ विवाहे सायंप्रातरौपासनहोमविधिः॥ आचम्य पवित्रे धृत्वा प्राणानायम्य देशकालौ संकीर्त्य अद्येत्यादि पूर्वोच्चरित एवंगुणविशेषणविशिष्टायां पुण्यतिथौ मम पात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं सायमौपासनहोमं तंडुलैर्होष्यामि। अथ ध्यानं। चत्वारि० वरदो भव। परिसमूहनं त्रिः। परिस्तरणं त्रिः। पर्युक्षणं। तूष्णीं अवज्वलनं प्रोक्षणं त्रिः पर्यग्निकृत्वा। तदुल्मुकं निरस्याग्नेः पश्चिमत आस्तीर्णकुशेषु समिधा सह हविर्निधाय। अन्वाचनं। विश्वानि न इति तिसृणामात्रेयो वसुश्रुतोऽग्निस्त्रिष्टुप्। अग्न्यर्चने वि०। ॐ विश्वानि नो० यत्त्वा हृदा० यस्मै त्वं सुकृते० इति पूर्वाभ्यामृग्भ्यां प्रतिपादमष्टदिक्षु गंधादिनाग्निमभ्यर्च्य तृतीयया बद्धांजलिर्नमस्कृत्य दक्षिणं जान्वाच्य समिधं तूष्णीमग्नौ प्रक्षिप्य पउपस्थश्य समिधि

५ प्रक्षालितानार्द्रसिततंडुलसमिध प्रभृति पात्रमग्नेरुत्तरतो निधाय। ५

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रदीप्तायांऽविधूमज्वालांगारेग्नौ शतसंख्याकान्प्रस्थस्य चतुःषष्टितमभागमितान्वा तंडुला
न्दक्षिणहस्तेनादाय सव्यपाणिं हृदि निधायांगुल्युत्तरपार्श्वेन समिन्मूलतो द्व्यंगुलप्रदे
शे। ओं अग्नये स्वाहेति हुत्वा अग्नय इदं न ममेति त्यक्त्वा तस्याग्नेयदेशे मनसा प्र
जापतये स्वाहा। प्रजापतय इदं॰ परिस्तरणानि विसृज्य परिसमूहन पर्युक्षणे कृत्वो
पस्थानं कुर्यात्। तत्र क्रमः। अग्न आयूंषीति तिसृणां शतं वैखानसा ऋषयः। अग्निः
पवमानो देवता। गायत्री छंदः। अग्न्युपस्थाने वि॰। ॐ अग्न आयूंषि॰ ऋक ३ अग्ने त्वं
न इति च तसृणां गौपायना लौपायना वा बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुश्चैकर्चा
ऋषयः। अग्निर्देवता। द्विपदा विराट् छंदः। अग्न्युपस्थाने वि॰ ॐ अग्ने त्वं नो अंतमः॰ शिव १
ऋक ४ प्रजापते हिरण्यगर्भः प्रजापति स्त्रिष्टुप्। प्रजापत्युपस्थाने वि॰ ॐ प्रजाप

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तेनस्वत॰ ऋक् १ तंतुंतन्वन्नित्यस्य देवा अग्निर्जगती। अग्न्युपस्थाने वि॰ ओं तंतुंतन्व
न्॰ ऋक् १ हिरण्यगर्भो हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्। प्रजापत्युपस्थाने वि॰ ओं हि
रण्यगर्भः स॰ ऋक् १ एतैर्मंत्रैर्वायव्यदेशे प्रह्वः कृतांजलिरग्निं वीक्षमाण उपस्था
य पुनरुपविश्य। मानस्तोके तिकुत्सोरुद्रो जगती। विभूतिग्रहणे विनियोगः। मानस्तो
केति ऋक् १। त्र्यायुषं जमदग्नेरिति ललाटे। कश्यपस्य त्र्यायुषमिति कंठे। अगस्त्य
स्य त्र्यायुषमिति नाभौ। यद्देवानां त्र्यायुषं दक्षिणांसे। तन्मे अस्तु त्र्यायुषं वामांसे।
शतायुषं शिरसि। ओं च मे स्व॰ तस्मै तेनमः। स्वस्ति श्रद्धां मेधां यशः प्रज्ञां विद्यां बु ×अग्नयेनमः।
४ आयुष्यं× द्धिं श्रियं बलं तेज आरोग्यं देहि मे हव्यवाहन। अथ अग्निप्रदक्षिणा। अग्ने नय ४ नमः।
सुपथा॰ वर्ग १ यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु। न्यूनं संपूर्णतां याति
सद्यो वंदे तमच्युतं। प्रमादात् कु॰ श्रुतिः। अनेन यथाज्ञानेन यथाशक्त्या सायमौप
सनहोमाख्येन कर्मणा अग्निरूपी परमेश्वरः प्रीयतां॥ ॥ विष्णुस्मरणं कृत्वा॥ ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्री ॥ अथ संक्षेपप्रातरौपासनहोमविधिः ॥ एवं प्रातरुदयात्पूर्वं प्रादुष्करणं कृत्वा होमकाले
२ पूर्ववत्पूर्वांगानि कृत्वा सूर्याय स्वाहेति सायं द्रव्येणैव प्रथमाकृतिं कृत्वा सायंकालद्विती
याकृतिवत् द्वितीयाकृतिं कृत्वा परिसमूहनादिकं कृत्वोपस्थानं कुर्यात् तत्र मंत्रः सूर्यो
नोदिवस्पात्विस्य सूर्य ऋक्षः सूर्योऽग्निश्च गायत्री सूर्योपस्थाने वि० । ॐ सूर्यो नो दि
वस्पातु० उदुत्य काण्वः प्रस्कण्वः सूर्यो गायत्री विनियोगः प्राग्वत् । ॐ उदुत्यं जातवेदसं० १
चित्रं देवानामांगिरसः कुत्सः सूर्यस्त्रिष्टुप् विनियोग उक्तः । ॐ चित्रं देवानामुत्० १ नमो मित्र
स्येति सौर्योऽभितपाः सूर्यो जगती विनियोग उक्तः । ॐ नमो मित्रस्य० १ एतैश्चतुर्भिः सूर्यं प्र
जापतेन ततः हिरण्यगर्भ इति द्वाभ्यां प्रजापतिं चोपस्थायों चमेदिति प्रातर्होमविशेषः । यो
दद्यात्कांचनं मेरुं पृथिवीं च ससप्तसागरां । सायंप्रातर्होमस्य तुल्यं भवति वा न वेति ॥ इति प्रातर्होमविधिः ॥
२

Kashi Maharani Collection, Ramnagar Fort, Varanasi